छायया स्त्रिया। चन्द्रमा ज्योत्स्नया यद्वद्विद्युत्वान् विद्युता यथा। अनुव्रजन्ती भर्त्तारं गृहात् पितृवनं मुदा। पदे पदेऽश्वमेधस्य फलं प्राप्नोत्यसंशयम्। व्याल-ग्राही यथा व्यालं बलादुद्धरते बिलात्। एवमुत्क्रम्य दूतेभ्यः पतिं स्वर्गं नयेत् सती। यमदूताः पलायन्ते सतीमालोक्य दूरतः। अपि दुष्कृतकर्माणं समुत्सृज्य च तत्पतिम्। न तथा बिभिमो वह्नेर्न तथा विद्युतो यथा। आयतन्तीं समालोक्य वयं दूताः पतिव्रताम्। तपनस्तप्यतेऽत्यन्तं दहनोऽपि च दह्यते। कम्पन्ते सर्व-तेजांसि दृष्ट्वा पातिव्रतं महः। यावत् स्वलोमसंख्यास्ति तावत् कोट्ययुतानि च। भर्त्रा स्वर्गसुखं भुङ्क्ते रम-माणा पतिव्रता। धन्या सा जननी लोके धन्योऽसौ जनकः पुनः। धन्यः स च पतिः श्रीमान् येषां गेहे पतिव्रता। पितृवंश्या मातृवंश्याः पतिवंश्यास्त्रयस्त्रयः। पतिव्रतायाः पुण्येन स्वर्गसौख्यानि भुञ्जते। शील-भङ्गेन दुर्वृत्ताः पातयन्ति कुलत्रयम्। पितुर्मातुस्तथा पत्युरिहामुत्र च दुःखिता। पतिव्रतायाश्चरणो यत्र यत्र स्पृशेद् भुवम्। तत्रेति भूमिर्मन्येत नात्र भारोऽस्ति पावनी। बिभ्यत् पतिव्रतास्पर्शं कुरुते भानुमानपि। सोमो गन्धवहश्चापि स्वपवित्राय नान्यथा। आपः पतिव्रतास्पर्शमभिलषन्ति सर्वदा। अद्य जाड्यविनाशो नो जातास्त्वद्यापि पावनाः। गृहे गृहे न किं नार्य्यो रूपलावण्यगर्विताः। परं विश्वेशभक्त्यैव लभ्यते स्त्री पतिव्रता। भार्य्या मूलं गृहस्थस्य भार्य्या मूलं सुखस्य च। भार्य्या धर्मफलावाप्त्यै भार्य्या सन्तान-वृद्धये। परलोकस्त्वयं लोको जीयते भार्य्यया द्वयम्। देवपित्रतिथीज्यादि नाभार्य्यः कर्म चार्हति। गृहस्थः स हि विज्ञेयो यस्य गेहे पतिव्रता। यसतेऽन्यः प्रति-पदं राक्षस्या जरयाऽथ वा। यथा गङ्गावगाहेन शरीरं पावनं भवेत्। तथा पतिव्रतादृष्ट्या शुभया पावनं भवेत्" ।"आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता" शु॰त॰।

**पतिष्ठ** त्रि॰ अतिशयेन पतिता इष्ठन् तृणो लोपः अतिश-शयेन पतितरि ऋ॰१०।१६५।५ उदा॰। ईयसुन् पतीयस् तत्रार्थे त्रि॰ पञ्चभीष्म ब्रा॰५।१।१२ उदा॰ स्त्रियां ङीप्।

**पतेर** पुंस्त्री पत—एर। १खगे उज्ज्वल॰ स्त्रियां जातित्वात् ङीष्। २गन्तरि त्रि॰ ३आढके ४गर्त्ते च पु॰ संक्षिप्तसा॰

**पत्काषिन्** त्रि॰ पादेन कषति गच्छति कष—णिनि पदादेशः ३त॰। पादेन गन्तरि। भट्टिः ३।४उदाहरणं द्रष्टव्यम्।

**पत्तङ्ग** न॰ पत्राङ्ग+पृषो॰। रक्तचन्दने (बकम) वृक्षभेदे शब्दर॰। "पत्तङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत्। हरिचन्दनवज्ज्ञेयं विशेषाद्दाहनाशनम्" भावप्र॰।

**पत्त** पु॰ पतत्यनेन पत—बा॰करणे तक् नेट्। पादे "निशी-र्षतो निपत्ततः" अथ॰ ६।१२।१।

**पत्तन** न॰ पतन्त्यत्र बा॰ आधारे तन। १नगरे महापु-र्य्याम् अमरः २मृदङ्गे हारा॰।

**पत्तनाधिपति** पु॰ ६त॰। राजभेदे भा॰अ॰ १८६अ॰।

**पत्तरङ्ग** पु॰ पट्टरङ्ग+पृषो॰। (बकम्) वृक्षे

**पत्ति** पु॰पद—तिन्। १सेनायाम्। २वीरे विश्वः क्तिन्। ३गतौ (१रथः २गजः ३अश्वाः ५सेनाः) एतत् संख्यान्विते ४सेनाभेदे च स्त्री। "एको रथो गजश्चैको नराः पञ्च पदातयः। त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते" भा॰आ॰१अ॰। ५पञ्चपञ्चाशदात्मकनरसैन्ये "नराणां पञ्चपञ्चाशदेषा पत्तिर्विधीयते" भा॰उ॰१५४अ॰।

**पत्तिगणक** त्रि॰ पत्तिं गणयति गण—ण्वुल् अकारान्तत्वेऽपि याजका॰ ६त॰स॰। पत्तीनां गणयितरि। ततः उद्गात्रा॰ भावे अञ्। पात्तिगणक तद्भावे।

**पत्तिन्** त्रि॰ पद्भ्यां तेलति तिल—गतौ बा॰ डिन्। पद्भ्यां गन्तरि। "पत्तिनो भुवि चैकस्य गोपस्याल्पबलीयसः" हरिवं॰ १००अ॰।

**पत्तिसंहति** स्त्री ६त॰। पादाते सेनावृन्दे अमरः।

**पत्तूर** पु॰ पत—बा॰ ऊर वृद्धूरा॰ निपा॰। १शालिञ्चशाके त्रिका॰ २पत्तङ्गे रक्तचन्दने न॰ शब्दच॰।

**पत्त्र(त्र)** न॰पत—ष्ट्रन् "झरोझरि सवर्णे" पा॰ वा तलोपः। १वाहनमात्रे २पर्णे ३पक्षिणां पक्षे अमरः। ४लेखना-धारे(पात्) इति ख्याते पदार्थे ५धातुमयपत्राकारे द्रव्ये च "सुवर्णपत्राभरणा च कार्य्या सुलोहपार्श्वद्वयशृङ्ख-लाभिः" ६लिप्यां स्त्री ङीप्। ७तेजपत्रे राजनि॰ "पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु। नि-हन्ति कफवातार्शोहृल्लासारुचिपीनसान्" भावप्र॰। तत्र लिखनाधारपत्रे "षाण्मासिके तु समये भ्रान्तिः संजायते यतः। धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरा" ज्यो॰त॰। तस्य रञ्जनं यथा "सुवर्णरूप्यरङ्गाद्यै रञ्जयेत् पत्रमुत्तमम्। सामान्योत्तममध्यानां पत्ररञ्जन-मीरितम्" तत्प्रमाणम् "षडङ्गुलाधिकं हस्तं पत्र-मुत्तममीरितम्। मध्यमं हस्तमात्रं स्यात् सामान्यं